# Natya Shastra Chapter 34

# નાટ્યશાસ્ત્રમ્ અધ્યાય ૩૪

## Document Information

Text title : shrIbharatamunipraNItaM nATyashAstram adhyAya 34

File name : natya34.itx

Category : natyashastra

Location : doc_z_misc_major_works

Author : Sage Bharata

Latest update : May 31, 2025

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2025

*sanskritdocuments.org*

Natya Shastra Chapter 34

# નાટ્યશાસ્ત્રમ્ અધ્યાય ૩૪

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અથ ચતુસ્ત્રિંશોઽધ્યાયઃ ।

તતવાદ્યવિધાનં તુ યન્ મયાઽભિહિતં પુરા ।
અવનદ્ધગતસ્યાપિ તસ્ય વક્ષ્યામિ લક્ષણમ્ ॥ ૧॥

યથોક્તં મુનિભિઃ પૂર્વં સ્વાતિનારદપુષ્કરૈઃ ।
સર્વલક્ષણસંયુક્તં સર્વાતોદ્યવિભૂષિતમ્ ॥ ૨॥

મૃદઙ્ગાનાં સમાસેન લક્ષણં પણવસ્ય ચ ।
દર્દરસ્ય ચ સઙ્ક્ષેપાદ્વિધાનં વાદ્યમેવ ચ ॥ ૩॥

અનધ્યાયે કદાચિત્તુ સ્વાતિર્મહતિ દુર્દિને ।
જલાશયં જગામાથ સલિલાનયનં પ્રતિ ॥ ૪॥

તસ્મિઞ્જલાશયે યાવત્ પ્રવિષ્ટઃ પાકશાસનઃ ।
ધારાભિર્મહતીભિસ્તુ પૂરયન્નિવ મેદિનીમ્ ॥ ૫॥

પતન્તીભિશ્ચ ધારાભિર્વાયુવેગાજ્જલાશયે ।
પુષ્કરિણ્યાં પટુઃ શબ્દઃ પત્રાણામભવત્તદા ॥ ૬॥

તેષાં ધારોદ્ભવં નાદં નિશમ્ય સ મહામુનિઃ ।
આશ્ચર્યમિતિ સમ્પ્રાપ્તમવધારિતવાન્ સ્વયમ્ ॥ ૭॥

જ્યેષ્ઠમધ્યકનિષ્ઠાનાં પત્રાણામવધાર્ય ચ ।
ગમ્ભીરમધુરં હૃદ્યમજગામાશ્રમં તતઃ ॥ ૮॥

ધ્યાત્વા સૃષ્ટિં મૃદઙ્ગાનાં પુષ્કરાનસૃજત્તતઃ ।
પણવં દર્દરં ચૈવ સહિતો વિશ્વકર્મણા ॥ ૯॥

દેવાનાં દુન્દુભિં દૃષ્ટ્વા ચકાર મુરજાંસ્તતઃ ।

આલિઙ્ગ્યશ્ચોર્ધ્વકં ચૈવ તથૈવાઙ્કિકમેવ ચ ॥ ૧૦॥

ચર્મણા ચાવનદ્ધાંસ્તુ મૃદઙ્ગાન્ દર્દરં તથા ।
તન્ત્રીભિઃ પણવં ચૈવમૂહાપોહવિશારદઃ ॥ ૧૧॥

ત્રયં ચાન્યાન્યપિ તથા કાષ્ઠાયસકૃતાન્યથ ।
ઝલ્લરીપટહાદીનિ ચર્મનદ્ધાનિ તાનિ ચ ॥ ૧૨॥

આતોદ્યસમવાયે તુ યાનિ યોજ્યાનિ વાદકૈઃ ।
અઙ્ગપ્રત્યઙ્ગયોગેન ગદતો મે નિબોધત ॥ ૧૩॥

વિપઞ્ચી ચૈવ ચિત્રા ચ દારવીષ્વઙ્ગસઞ્જ્ઞિતે ।
કચ્છપીઘોષકાદીનિ પ્રત્યઙ્ગાનિ તથૈવ ચ ॥ ૧૪॥

મૃદઙ્ગા દર્દરાશ્ચૈવ પણવાશ્ચાઙ્ગસઞ્જ્ઞિતાઃ ।
ઝલ્લરીપટહાદીનિ પ્રત્યઙ્ગાનિ તથૈવ ચ ॥ ૧૫॥

અઙ્ગલક્ષણસંયુક્તો વિજ્ઞેયો વંશ એવ હિ ।
શાખસ્તુણ્ડિકિની ચૈવ પ્રત્યઙ્ગૈ પરિકીર્તિતે ॥ ૧૬॥

નાસ્તિ કિઞ્ચિદનાયોજ્યમાતોદ્યં દશરૂપકે ।
રસભાવ પ્રયોગં તુ જ્ઞાત્વા યોજ્યં વિધાનતઃ ॥ ૧૭॥

ઉત્સવે ચૈવ યાને ચ નૃપાણાં મઙ્ગલેષુ ચ ।
શુભકલ્યાણયોગે ચ વિવાહકરણે તથા ॥ ૧૮॥

ઉત્પાતે સમ્ભ્રમે ચૈવ સઙ્ગ્રામે પુત્રજન્મનિ ।
ઈદૃશેષુ હિ કાર્યેષુ સર્વાતોદ્યાનિ વાદયેત્ ॥ ૧૯॥

સ્વભાવગૃહવાર્તાયામલ્પભાણ્ડં પ્રયોજયેત્ ।
ઉત્થાનકાર્યબન્ધેષુ સર્વાતોદ્યાનિ વાદયેત્ ॥ ૨૦॥

અઙ્ગાનાં તુ સમત્વાચ્ચ છિદ્ર પ્રચ્છાદને તથા ।
વિશ્રામહેતોઃ શોભાર્થં ભાણ્ડવાદ્યં વિનિર્મિતમ્ ॥ ૨૧॥

તત્રાવનદ્ધે વક્ષ્યામિ વિધિં સ્વરસમુત્થિતમ્ ।
નાનાકરણસંયુક્તં ભાર્ગજાતિવિભૂષિતમ્ ॥ ૨૨॥

યાવન્તિ ચર્મનદ્ધાનિ હ્યાતોદ્યાનિ દ્વિજોત્તમાઃ ।
તાનિ ત્રિપુષ્કરાદ્યાનિ હ્યવનદ્ધમિતિ સ્મૃતમ્ ॥ ૨૩॥

એતેષાં તુ પુનર્ભેદાઃ શતસઙ્ખ્યાઃ પ્રકીર્તિતાઃ ।
કિન્તુ ત્રિપુષ્કરસ્યાસ્ય લક્ષણં પ્રોચ્યતે મયા ॥ ૨૪॥

શેષાણાં કર્મબાહુલ્યં યસ્માદસ્મિન્ન દૃશ્યતે ।
ન સ્વરા પ્રહારાશ્ચ નાક્ષરાણિ ન માર્જનાઃ ॥ ૨૫॥

ભેરીપટસજમ્ભાભિસ્તથા દુન્દુભિડિણ્ડમૈઃ ।
શૈથિલ્યાદાયતત્ત્વાચ્ચ સ્વરેઽગામ્ભેર્યમિષ્યતે ॥ ૨૬॥

પ્રાયશસ્તાનિ કાર્યાણિ કાલં કાર્યં સમીક્ષ્ય તુ ।
કિન્તુ ત્રિપુષ્કરસ્યાસ્ય શ્રૂયતાં યો વિથિઃ સ્મૃતઃ ॥ ૨૭॥

વાચ્યાત્મકો ભવેચ્છબ્દઃ સ ચાપિ દ્વિવિધો મતઃ ।
સ્વરવાંશૈવ વિજ્ઞેયસ્તથા ચૈવાભિધાનવાન્ ॥ ૨૮॥

તત્રાભિધાનવાન્ નામ નાનાભાષાસમાશ્રયઃ ।
સ્વરવાનપિ વિજ્ઞેયો નાનાતોદ્યસમાશ્રયઃ ॥ ૨૯॥

શારીર્યામેવ વીણાયાં સ્વરાઃ સપ્ત પ્રકીર્તિતાઃ ।
તેભ્યો વિનિઃસૃતાશ્ચૈવમાતોદ્યેષુ દ્વિજોત્તમાઃ ॥ ૩૦॥

પૂર્વશરીરાદુદ્ભુતાસ્તતો ગચ્છન્તિ દારવીમ્ ।
તતઃ પુષ્કરજં ચૈવમનુયાન્તિ ઘનં પુનઃ ॥ ૩૧॥

તેષાં વાક્કરણૈર્જ્ઞેયાઃ પ્રહારા વચનાશ્રયાઃ ।
ઝણ્મણ્યા ચેતિ સંયુક્તા વીણાવાદ્યપ્રયોગિનઃ ॥ ૩૨॥

શારીર્યામથ વીણાયાં ઝણ્ટુ જગદિ યાદિ ચ ।
ભવેદ્વાક્કરણં તત્ર નાનાકરણસંયુતમ્ ॥ ૩૩॥

યં યં ગાતા સ્વરં ગચ્છેત્તામાતોદ્યૈઃ પ્રયોજયેત્ ।
યતિપાણિસમાયુક્તં ગુરુલઘ્વક્ષરાન્વિતમ્ ॥ ૩૪॥

પૌષ્કરસ્ય તુ વાદ્યસ્ય મૃદઙ્ગપણવાશ્રયમ્ ।
વિધાનં સમ્પ્રવક્ષ્યામિ દર્દરસ્ય તથૈવ ચ ॥ ૩૫॥

ષોડશાક્ષરસમ્પન્નં ચતુર્માર્ગં તથૈવ ચ ।
વિલેપનં ષટ્કરણં ત્રિયતિ ત્રિલયં તથા ॥ ૩૬॥

ત્રિગતં ત્રિપ્રકારં ચ ત્રિસંયોગં ત્રિપાણિકમ્ ।
દશાર્ધપાણિપ્રહતં ત્રિપ્રહારં ત્રિમાર્જનમ્ ॥ ૩૭॥

વિંશત્યલઙ્કારયુતં તથાષ્ટાદશજાતિકમ્ ।
એભિઃ પ્રકારૈઃ સમ્પન્નં વાદ્યં પુષ્કરજં ભવેત્ ॥ ૩૮॥

તત્ર ષોડશાક્ષરમિતિ યદુક્તં તદનુવ્યાખ્યાસ્યામઃ
કખગઘટઠડઢતથદધમરલહ ઇતિ ષોડશાક્ષરાણીહ ।
નિયતં પુષ્કરવાદ્યે વાક્કરણૈઃ સંવિધેયાનિ ॥ ૩૯॥

ચતુર્માગં નામ । આલિપ્તાઙ્કિતગોમુખવિતસ્તાશ્ચત્વારો માર્ગાઃ ।
દ્વિલેપં નામ । વમોર્ધ્વકપ્રલેપાત્ ।
ષટ્કરણં નામ । રૂપં કૃતપ્રતિકૃતં પ્રતિભેદો રૂપશેષમોઘઃ પ્રતિશુલ્કા ચેતિ ।
ત્રિયતિર્નામ । સમા સ્રોતોગતા ગોપુચ્છા ચેત્યન્વયાત્ ।
ત્રિલયં નામ । દ્રુતમધ્યવિલમ્બિતયોગાત્ ।
ત્રિગતં નામ । તત્ત્વમનુગતમોઘશ્ચેતિ ।
ત્રિપ્રચારં નામ । સમપ્રચારો વિષમપ્રચારઃ સમવિષમપ્રચારશ્ચેતિ ।
ત્રિસંયોગં નામ । ગુરુસંયોગો લઘુસંયોગો ગુરુલઘુસંયોગશ્ચેતિ ।
ત્રિપાણિકં નામ । સમપાણિરવપાણિરુપરિપાણિશ્ચેતિ ।
પઞ્ચપાણિપ્રહતં નામ ।
સમપાણ્યર્ધસમપાણિરર્ધાર્ધસમપાણિઃ પાર્શ્વપાણિ પ્રદેશિની ચેતિ ।
ત્રિપ્રહારં નામ । નિગૃહીતોઽર્ધનિગૃહીતો મુક્તશ્ચેતિ ।
ત્રિમાર્જનં નામ માયૂર્યર્ધમાયૂરી કાર્માર્વી ચેતિ ।
વિંશત્યલઙ્કારાઃ અષ્ટાદશજાતિશ્ચ પદભેદે દર્શયિષ્યામઃ ॥ ૪૦॥

એતાવત્ સૂત્રમ્ । અતઃ પદભેદઃ । તત્ર ષોડશાક્ષરં નામ ।
અભિવ્યઞ્જિતાનિ પૂર્વં યાન્યેતાનિ ષોડશાદ્યાનિ ॥

તાન્યક્ષરાણિ જાનીત પુષ્કરેષુ યથાક્રમમ્ ।
પણવે દર્વરે ચૈવ મૃદઙ્ગેષુ તથૈવ ચ ॥ ૪૧॥

કખતથભાસ્તુ દક્ષિણમુખેઽત્ર ઘધમહાશ્ચ વામકે નિયતાઃ ।
ગદકારૌ ચૈવોર્ધ્વે દઠડોણ લાઃ સ્યુરાલિઙ્ગે ॥ ૪૨॥

એતેષામક્ષરાણાં સ્વરસંયોગં વ્યઞ્જનસંયોગં ચ વ્યાખ્યાસ્યામઃ ।
તત્ર અ આ ઇ ઈ ઉ એ ઓ અં ઇતિ સ્વરા વ્યઞ્જનૈઃ સહ સંયોગં ગચ્છન્તિ
। અકારેકારોકારૈકારૌકારાઙ્કારા ઇતિ કકારે । યથા । કકિકુકેકોકમિતિ ।
ઇકારૈકારૌકારા ઇતિ ખકારે । ખિખેખો ઇતિ ।

ઉકારૈકારૌ ગકારે । યથા ગુગે ઇતિ ।
અકારેકારોકારૌકારા ઇતિ ઘકારે । યથા ઘઘિઘુઘો ઇતિ ।
અકારાકારેકારૌકારાઙ્કારા ટકારે । યથા ટટાટિટોટમિતિ ।
અકારાકારેકારૈકારૌકારાઙ્કારા ઇતિ ઠકારે । યથા ઠઠાઠિઠેઠોઠમિતિ ।
એકારૌકારૌ ઢકારે । યથા ઢેઢો ઇતિ ।
અકારાકારૈકારૌકારા ઇતિ ણકારે । યથા ણણાણેણો ઇતિ ।
અકારાકારેકારૈકારા ઇતિ તથયોઃ । યથા તતાતિતે યથાથિથે ઇતિ ।
અકારોકારૈકારૌકારા ઇતિ દકારે । યથા દદુદેદો ઇતિ ।
અકારાકારેકારૌકારાઙ્કારા ઇતિ ઘકારે । યથા ઘઘાઘિઘે ।
આકારેકારૈકારા ઇતિ રેફે । યથા રરારિરે ઇતિ ।
અકારેકારૈકારા ઇતિ લકારે । યથા લલાલિલે ઇતિ ।
હકારમકારૌ શુદ્ધૌ ॥ ૪૩॥

કકારગકારઘકારતકારધકાદકારાણાં રેફોઽનુબન્ધઃ ।
યથા ક્ર ગ્ર ઘ્ર ત્ર દ્ર
ધ્ર । કકારસ્ય લકારોઽનુબન્ધઃ । યથા ક્લ ક્લે ક્લમિતિ ।
હકારસ્ય ણકારોઽનુબન્ધઃ । યથા હ્ણ ઇતિ । તકારસ્ય થકારોઽનુબન્ધઃ ।
યથા ત્થ ઇતિ । દકારસ્ય ધકારોઽનુબન્ધઃ । યથા દ્ધં દ્ધા દ્ધે ઇતિ ।
એવમેતૈઃ સંયોગૈર્દ્વિહસ્તસંયુક્તાન્યક્ષરાણિ ભવન્તિ ॥ ૪૪॥

તત્રૈત એવ દ્વિપુષ્કરે । આઙ્કિકમૃદઙ્ગે દ્વિપુષ્કરે
સમહસ્તનિપાતનાદ્ધકારઃ । તત્રૈવાઙ્ગુલિપ્રચલનાદ્ધ્રકારઃ ।
તત્રૈવાવષ્ટમ્ભાત્તત્રૈવાર્ધનિગૃહીતાત્ સ્થકારઃ ।
તત્રૈવ દક્ષિણમુખે પાર્ષ્ણિનિપીડિતે કકારઃ ।
તત્રૈવાઙ્ગુલિકુઞ્ચનાત્કુકારઃ । ઊર્ધ્વકવામકયોઃ ।
સમહસ્તનિપાતનાદ્ધઙ્કારઃ । પ્રદેશિન્યા ચાલિઙ્ગે ક્રેઙ્કારઃ ॥ ૪૫॥

પઞ્ચપાણિપ્રહતમિતિ યદુક્તં સમપાણ્યવપાણ્યર્ધાર્ધપાણિપાર્શ્વપાણિપ્રદેશિન્યશ્ચેતિ ।
ત એતે પઞ્ચપાણિપ્રહતા કે નિગૃહીતાર્ધનિગૃહીતયુક્તા યથાયોગ કાર્યાઃ ।
તત્ર સમપાણિપ્રહતો મકારઃ સ નિગૃહીતઃ ।
ગકારધકારદકારપકારા અર્ધપાણિપ્રહતા અર્ધનિગૃહીતાઃ ।
કકારખકારટકારદકારાઃ પાર્શ્વપાણિપ્રહતા નિગૃહીતાશ્ચ ।
તકારથકારાવર્ધાર્ધપાણિહતાવર્ધનિગૃહીતૌ ।
પ્રદેશિન્યા હતાં આલિઙ્ગે ઢકારણકારેફવકારા યુક્તાઃ ।

દ્વિહસ્તપ્રહતા ધ્રુદઊઁલ્કે ઇતિ ।
મુક્તપાર્શ્વે થિક્રા ઇત્યર્ધપાણિહતા નિગૃહીતાઃ ।
એવ્રમેતેષ્વક્ષરેષુ પ્રયોગવશેન કાર્યા પ્રહારાઃ ॥ ૪૬॥

ષોડશૈતાનિ દૃષ્ટાનિ વાદ્યજાન્યક્ષરાણિ તુ ।
અનેનૈવ વિધાનેન યોજ્યં વાક્કરણં બુધૈઃ ॥ ૪૭॥

ચતુર્માર્ગં યદુક્તં તમનુવ્યાખ્યાસ્યામઃ
અડ્ડિતાલિપ્તમાર્ગે તુ વિતસ્તા ગોમુખી તથા ।
માર્ગાશ્ચત્વાર એવૈતે પ્રહારકરણાશ્રયાઃ ॥ ૪૮॥

તત્ર કિટ્ટુમૃદઙ્ગપ્રહારયુક્તોઽડ્ડિતમાર્ગો વામોર્ધ્વપ્રહારયુસ્ત
આલિપ્તમાર્ગઃ । ઊર્ધ્વકાડ્ડિકે દક્ષિણમુખે આલિપ્તહસ્તો વિતસ્તમાર્ગઃ ।
આલિઙ્ગકકરણબહુલઃ સર્વપુષ્કરહતો ગોમુખીમાર્ગ ઇતિ ॥ ૪૯॥

તત્રાડ્ડિત પ્રહારજાતમ્ ।
ભટકટથિધઘટઘેધોધહમન્ધિ ધન્ધનધિધિ ઇત્યડ્ડિતામાર્ગઃ ।
ધડઃ ગુટુગુટમઘેદોધિન્ધદુધિદુર્ઘેધિ કિટ્ટાકિટુમેટ-કિતાં
કિટ્ટેકિતાન્દ—તસિતાં ગુટુગેત્યેવં જ્ઞેયો વિતસ્ત્યાસ્તુ ।
શુદ્ધં સિદ્ધં મદ્ધિકુટઘેઘેમત્થિદ્ધિધખુધુણઙ્ઘેધોટત્થિમટ ગોમુખીમાર્ગઃ ॥ ૫૦॥

કુર્યાદ્વિતસ્તિમાગે થરવ્રિવર્જિતાન્ પ્રહારાંસ્તુ ।
ઉદ્ધતમાર્ગેણ વિના શેષાઃ કાર્યાસ્તુ ગોમુખ્યામ્ ॥ ૫૧॥

દ્રો માંસ્તુ ગુટુગુટુઘેદ્ર થણૈઘટકેદોરાડિમ્
એવં વિવાદ્યં વિજ્ઞેયં વાદકૈસ્તજ્જ્ઞૈઃ ।
ઠિણિખિઠિણિહો ડડડધો ગોમુખ્યામ્ ॥ ૫૨॥

યે ત્વાલિપ્તસમુત્થા સર્વમાગૈસ્તુ તે વિધાતવ્યા ।
ગ્રહગો ન લક્ષ્યસત્ત્વો નાટ્યવિધાનં સમાસાદ્ય ।
ગ્રહમોક્ષણસન્ધાનૈસ્તુ મૃદઙ્ગાનાં ગ્રહો ભવતિ ॥ ૫૩॥

એતેષાં ચૈવ વક્ષ્યામિ દર્શનાનિ યથાક્રમમ્ ।
ચતુર્ણામપિ માર્ગાણામક્ષરગ્રહણં યથા ॥ ૫૪॥

દાઘદદથિમટાં ધીમઠાં દિથિથિક્લં થિક્લાથિન્તાઙ્ક્લાથિકટામ્ ।
કટધિમટાં ખોખોઘેટાતડ્ડિતાવાદ્યમ્ ॥ ૫૫॥

તન્ત્રાન્તિકિતા ધન્ધન્દ્ર ઘટિતયેટમ્ ।

યટથકિકેત્તવિતસ્તાયામ્ ॥ ૫૬॥

ધ્રામ્માં ઘુટૂઘેઘેટાઘટિતકથિથિધોટામામ્ ।
આલિપ્તકસંયોગો કાર્યે સંવાદને સમ્યક્ ॥ ૫૭॥

ધ્રટમિથિઘેટાઙ્ઘેઘેતમથિધોણાખમત્થિધક્લેન્તામ્ ।
ખોખોથાથા ણાણાણાણા ચ ગોમુખ્યામ્ ॥ ૫૮॥

એતેષાં પુષ્કરાણાં ત્રિવિધઃ પ્રચારઃ । સમપ્રચારો વિષમપ્રચારઃ સમવિષામપ્રચાર ઇતિ ॥ ૫૯॥

તત્ર
વામોર્ધ્વકયોર્વામઃ સવ્યો વૈ દક્ષિણોર્ધ્વકે ચાપિ કાર્યઃ ।
સમપ્રચારે હ્યાલિપ્તે લિપ્તવાદ્યકરણે તુ ॥ ૬૦॥

વામોર્ધ્વકસવ્યાનાં પ્રહતો વામઃ કરસ્તુ કર્તવ્યઃ ।
સવ્યોર્ધ્વકસંયોગાત્પ્રહતો હસ્તપ્રચારે તુ ॥ ૬૧॥

સ્વચ્છન્દકઃ કરાણાં પ્રહતં શેષેષુ માર્ગકરણેષુ ।
અઙ્કિતગોમુખયોગે સમવિષમો હસ્તસઞ્ચારઃ ॥ ૬૨॥

શ‍ૃઙ્ગારહાસ્યયોગે વાદ્યં યોજ્યં તથાઽઙ્કિતે માર્ગે ।
વીરાદ્ભુતરૌદ્રા ણાં વિતસ્તમાર્ગેણ વાદ્યં તુ ॥ ૬૩॥

કરુણરસેઽપિ હિ વાદ્યં યોજ્યં હ્યાલિપ્તકરણમાર્ગે તુ ।
બીભત્સભયાનકયોસ્તથૈવ નિત્યં હિ ગોમુખ્યા ॥ ૬૪॥

રસસત્વભાવયોગાન્ દૃષ્ટ્વાભિનયં ગતિપ્રચારાંશ્ચ ।
વાદ્યં નિત્યં કાર્યં યથાક્રમં વાદ્યયોગજ્ઞૈઃ ॥ ૬૫॥

એવં પ્રહતવિધાનં કાર્યં માર્ગાશ્રિતં બુધૈઃ સમ્યક્ ।
વક્ષ્યામ્યતશ્ચ ભૂયો દર્દરપણવાશ્રિતં વાદ્યમ્ ॥ ૬૬॥

અતિવાદિતમનુવાદ્યં સમવાદિતમુચ્યતે પણવવાદ્યમ્ ।
તત્રાતિવાદિતં સ્યાન્ મુરજાનામગ્રતો યત્તુ ॥ ૬૭॥

યત્વનુગતં મૃદઙ્ગૈરનુવાદિતમુચ્યતે તુ તદ્વાદ્યમ્ ।
સમવાદિતં મૃદઙ્ગૈર્જ્ઞેયં સામ્યેન યદ્વાદ્યમ્ ॥ ૬૮॥

કખગા ઠઠણા દેહ્રા ણરલા ક્રુલિલન્દ્રણેતિ કિરિકિહ્રા ।
એતે વર્ણાઃ પણવાતોદ્યવિધાને વિધાતવ્યાઃ ॥ ૬૯॥

ધોધોણાધોકિહુલં પ્રહુલં ભ્ભિતિ રિણિતિ રિભ્થભ્રે
કશ્ચિત્વાઢેઢેણ્ઢણાં પણવવાદ્યમ્ ।
ણ્હોણિકિમિકિર્લૈણોણ ઇતિ પણવવાદ્યં તુ ॥ ૭૦॥

તસ્ય પ્રહતં કાર્યં કનિષ્ઠિકાનામિકાગ્રકોણેન ।
નાનાકરણવિભાગૈઃ પણવે શિથિલાઞ્ચિતે તજ્જ્ઞૈઃ ॥ ૭૧॥

વાદકકનિષ્ઠિકાભ્યાં શીઘ્રકૃતાઃ કરેઽથ નેણોહાઃ ।
શેષાસ્તુ વાદનકૃતાઃ સ્મૃતાઃ પ્રહારા બિવિધાદ્યાઃ ॥ ૭૨॥

કોણાનામિકવાદ્યં મધ્યાઙ્ગુલ્યા હિ વાદનં કાર્યમ્ ।
કોણાનામિકવાદ્યં શુદ્ધં પ્રહતં ભવેદેતત્ ॥ ૭૩॥

ભ્રાન્તકયોગાત્ ક્રિહુળમિત્યેતત્ ભ્રાન્તવાદનાગ્રેણ ।
રિભિતકરણાનુવિદ્ધં તત્રામસ્તત્ર કારસ્તુ ॥ ૭૪॥

શીઘ્રકરણાનુવિદ્ધૈર્ડકારસ્ત્વર્ધહસ્તસંયોગાત્ ।
સ તુ વાદકેન વાદ્યે ધુર્યેણ વિશેષતઃ કાર્યઃ ॥ ૭૫॥

સ્વઞ્ચિતકચ્છૌ પણવૌ કૃત્વા ધુર્યપરિવાદકસ્યાં હિ ।
રણણકિકિહિકિણિઙ્ઙ ઇતિ પ્રહારા વિધાતવ્યાઃ ॥ ૭૬॥

અઞ્ચિતકક્ષ્યે પણવે રેફઃ સોઽર્ધે તુ હસ્યોર્ધ્વે ગ્રહે ।
કાર્યો મયૂરકકરા સૂક્ષ્મૌઘાસ્તથા પ્રહારા વિધાતવ્યાઃ ॥ ૭૭॥

કૃત્વા ચ શિથિલકક્ષ્યાં કાર્યાસ્તુ કનિષ્ઠિકાપ્રકોણેન ।
તેનૈવ ચરે પ્રેદ્ધો ભાગે ઇત્યઞ્ચિતેનૈવ ॥ ૭૮॥

અઞ્ચિતશિથિલે પણવે કઠણાનિકિણિકિણિકૃતાઃ ।
પ્રહારાસ્તુ વૈભ્રાન્તકકરણેન તથા સ્વઞ્ચિતકક્ષ્યે ચ શિથિલે ચ ॥ ૭૯॥

અઞ્ચિતકક્ષ્યે પણવે કખરટણકૃતા મતાઃ પ્રહારાસ્તુ ।
ધિન્ને ઇતિ પ્રહારાઃ પણવે તુ સદા શિથિલકક્ષ્યે ॥ ૮૦॥

કખરટકૃતાઃ પ્રહારાઃ સોચ્છ્વાસે હિ પણવે વિધાતવ્યાઃ ।
શેષા ભ્રાન્તકયોગાઃ સંયુક્તાઃ સંવિધાતવ્યાઃ ॥ ૮૧॥

ટઙ્કારેણ સ્વનજં વાદ્યં કક્ષ્યાઞ્ચિતે તુ સમ્ભવતિ ।
તેન નકારો યુક્તો ભ્ર ઇતિ ચ પણવે પ્રહારઃ સ્યાત્ ॥ ૮૨॥

તિર્યગ્ગૃહીતવાદનમુખવર્તિત ઇષ્યતે તકારસ્તુ ।

તહુલં તહુલં ક્રમશશ્ચૈવં હ્યેતે પ્રહારાસ્તુ ॥ ૮૩॥

એવં પણવે વાદ્યં વિધિવત્ સઙ્ક્ષેપતો યથાઽભિહિતમ્ ।
વક્ષ્યામ્યતઃ પરમહં દર્દરવાદ્યાક્ષરાણ્યેવ ॥ ૮૪॥

રેકૢતિકુત્ખનોત્વનોધન્મોગોણેહધિણણસંયુક્તાઃ ।
ઇતિ દર્દરે પ્રહારાઃ કાર્યા મુક્તા નિષણ્ણાશ્ચ ॥ ૮૫॥

કાર્યાસ્તત્ર નિષણ્ણા રગ્રદ્રઙ્કિ ઇતિ ચ દક્ષિણકરેણ ।
વામેન ગોમદોત્થા ન નખસ્પૃષ્ટઃ પ્રકારોઽગ્રે ॥ ૮૬॥

મુક્તૌ તીત્રિત્રિણ ભવેન્નિપીડને કરદ્વયેનાપિ ।
ધીમુક્તઃ પ્રહતં સ્યાદનુસ્વને તાડિતે ચૈવ ॥ ૮૭॥

સ્યાત્ પીડિતે ચ ધિઙ્કિત્યેતન્મુક્તં તથા વિમુક્તેઽપિ ।
શેષા ભવન્તિ મુક્તાસ્તન્કા ઇતિ ચૈવ નિગૃહીતે ॥ ૮૮॥

શીઘ્રકરણાનુબન્ધસ્થિતિરેવ હિ નિઃસ્વનઃ સ્ખલિતકં સ્યાત્ ।
ઇતિ દર્દરે પ્રહારાઃ સમાસતસ્તત્ર વિજ્ઞેયાઃ ॥ ૮૯॥

એવં ત્વસઙ્કરકૃતા પ્રહારશુદ્ધિરિહ કીર્તિતા તજ્જ્ઞૈઃ ।
દર્દરપણવમૃદઙ્ગૈર્મિશ્રિતવાદ્યં પ્રવક્ષ્યામિ ॥ ૯૦॥

તત્ર વ્યક્તીભાવં વાદ્યે ગચ્છન્તિ મિશ્રિતાઃ કેચિત્ ।
કેચિદ્યુગપત્કરણં કેચિત્ પર્યાયકરણં તુ ॥ ૯૧॥

એકૈકસમ્પ્રયુક્તા વર્ણાનુગતસ્તથૈવ સમ્પૃક્તા ।
ઘOન્દ્રે રેદોખોકોત્રિહુલં તત્કૃતા મૃદઙ્ગેષુ ॥ ૯૨॥

અથ દર્દરેઽપિ ધિન્ધિઙ્ક્લેતે પણવયોસ્તુ સંયુક્તાઃ ।
ડણકે ખોદદોદે દિધિરે દિધિનિ મિશ્રાસ્તુ ॥ ૯૩॥

આભ્યો યેઽન્યે શેષાસ્તે મિશ્રા એવ નિત્યશઃ કાર્યાઃ ।
પૂર્વોઽપિ ચ મિશ્રત્વં વ્રજન્તિ સર્વે યથાયોગમ્ ॥ ૯૪॥

અથ યુગપત્કરણાનિ તુ હઙ્કઙ્કિકુકુનાણન્ધ્રલન્દોઙ્કમ્ ।
ગ્રહુલં નઙ્કાદો એવં યોજ્યાસ્તુ પણવે હિ ॥ ૯૫॥

ધુર્યઃ કૃતાસુ ક્રમશઃ કરણે પરિવાદનેન કર્તવ્યા ।
કોખોદેદોધોણઙ્કેતિ કિણિકિણિતિ કૃતાશ્ચ ॥ ૯૬॥

પણવાનામનુબન્ધે કાર્યં ધુક્દુણ્કેતિ વાદ્યં તુ ।
ભૂયઃ પ્રતિકૃતિભેદો માર્દઙ્ગિકદર્દરિભ્યાં ચ ॥ ૯૭॥

યદ્યત્કુર્યાન્મુરજે પ્રહારજાતં ગતિપ્રચારેષુ ।
અનુગતમક્ષરવૃત્તં તદેવ વાક્યં તુ પણવેઽપિ ॥ ૯૮॥

ન હિ ચિત્રં કર્તવ્યં ગતિપ્રચારેષુ વાદનં તજ્જ્ઞૈઃ ।
સમવિષમં તત્ર હિ યદ્વૃક્ષ્યં પાદસઞ્ચારે ॥ ૯૯॥

ઉપરિકરણે યથેષ્ટં કર્તવ્યસ્તુ પણવો મૃદઙ્ગેષુ ।
તત્ર પ્રહારકરણૈર્મૃદઙ્ગવાદ્યં વિધાતવ્યમ્ ॥ ૧૦૦॥

પ્રાયેણ સર્વવાદેષ્વાદૌ પણવગ્રહઃ પ્રયોક્તવ્યઃ ।
વક્ષ્યામ્યહમતઃ પરં તુ લક્ષણં કરણજાતસ્ય ॥ ૧૦૧॥

રૂપં કૃતપ્રતિકૃતં પ્રતિભેદો રૂપશેષમોઘસ્ય ।
ષષ્ઠી ચ પ્રતિશુક્લેત્યેવં જ્ઞેયં કરણજાતમ્ ॥ ૧૦૨॥

તત્ર રૂપં નામ વિભક્તકરણમ્ । યથા
ઘઙ્ઘઙ્ગેઘં કિટિમા કિટિમા ઘટત્થિ ઘટપત્થિ ।
ઘદુગુરુકિટિકટ કૃણ્ દોઘે દોઘે ક્લે ॥ ૧૦૩॥

ઇતિ રૂપમ્ ।
કૃતપ્રતિકૃતં નામ યત્રૈકં કરણં ત્રિપુષ્કર ઇત્યુદ્ભાવયતિ
યથા
દઙ્ખુખુણક્રમધિમદાણ્ણેટોટતિતોટમત્થિમાનક્રમ્ ।
ગુરુખે કિહુલે દોણ્ દોસ્રો દોઘોણ ખે વાદ્યમ્ ॥ ૧૦૪॥

પ્રતિભેદો નામ યુગપત્કૃતે કરણે મૃદઙ્ગાનાં યદુપરિકરણેન
ગચ્છન્તિ યત્ । દાધા ધાણિધા મટગતમધિં ઘટે ઘટે
દોઘે ઘટ મત્થિણણ્કો ખો ।
એભિઃ કરણવિશેષૈઃ પ્રતિભેદો નામ વિજ્ઞેયઃ ॥ ૧૦૫॥

ઇતિ વાદ્યમ્
રૂપશેષં નામ કરણાનામવિશેષો યથા
ખુખુણં ણણણણણણાં મઢાઘેવ મથિટાં ઘેટાં ઘેદો ।
યે ઘેટમઢિણષ્ણરવો ઇતિ વાદ્ય રૂપશેષં તુ ॥ ૧૦૬॥

પ્રતિશુલ્કં નામાનુસ્વારો માર્દઙ્ગિકદર્દરવાદકાનામ્ । યથા ।

ઘટમથિ કુણકિટિ ગખાખા કથિધિજાણણકોખોણાખા ।
કુટકટિ કુણકિટિ કટખે પ્રતિશુલ્કાખ્યં સદા કરણમ્ ॥ ૧૦૭॥

ઓઘો નામ સર્વભાણ્ડવિધેયો દ્રુતપાણિલયો નદ્યોઘવત્
ઓઘો યથા
ઘટ્ટિટિમથકિટિકિટિવે ઘદઘુદેદેણ ધાણ દાધાનણોખો ।
ઘદુગુદુઘુદુગુદુપદઘેરેણિણ એતે તથૌઘે ચ ॥ ૧૦૮॥

કરણાનાં સમાયોગઃ ષડ્વિધઃ પરિકીર્તિતઃ ।
અનેનૈવ વિધાનેન યોજ્યં વાક્કરણં બુધૈઃ ॥ ૧૦૯॥

ત્રિયતિ નામ । સમા સ્રોતોગતા ગોપુચ્છા ચેતિ ।
લયયતિપાણીનાં ત્રિવિધઃ સંયોગઃ । સ ચ ત્રિપ્રકારો ભવતિ ।
તદ્યથા । રાદ્ધં વિદ્ધં શય્યાગતં ચેતિ ॥ ૧૧૦॥

ત્રિલયં નામ । દ્રુતો મધ્યો વિલમ્બિતશ્ચેતિ ॥ ૧૧૧॥

ત્રિપાણિકં નામ સમપાણિરર્ધપાણિરુપરિપાણિશ્ચેતિ ॥ ૧૧૨॥

સમાયતિર્દ્રુતશ્ચૈવ લયો યત્ર ભવેદથ ।
તથૈવોપરિપાણિશ્ચ રાદ્ધસ્ત્વેષ વિધિર્ભવેત્ ॥ ૧૧૩॥

સ્રોતોગતા યતિર્યત્ર લયો મધ્યસ્તથૈવ ચ ।
સમપાણિસ્તથા ચૈવ વિદ્ધં વાદ્યં તુ તદ્ભવેત્ ॥ ૧૧૪॥

અર્ધપાણિસ્તુ યત્ર સ્યાત્તથા ચૈવ સ્થિતો લયઃ ।
યતિશ્ચૈવ તુ ગોપુચ્છા વાદ્ય શય્યાગતં તુ તત્ ॥ ૧૧૫॥

સ્થિતાલ્લયાત્પ્રભૃત્યેષાં પ્રમાણં સમ્પ્રવર્તતે ।
કાર્યહાનિં કલાનાં ચ શેષેષ્વન્યેષુ પાણિષુ ॥ ૧૧૬॥

યતયઃ પાણયશ્ચૈવ લયા વૈ વાદ્યસંશ્રયાઃ ।
યયાકામં હિ કર્તવ્યા નાટ્યશક્તિમવેક્ષ્ય તુ ॥ ૧૧૭॥

ત્રિમાર્જનં નામ ।
માયૂરી હ્યધમાયૂરી તથા કાર્મારવીતિ ચ ।
તિસ્રસ્તુ માર્જના જ્ઞેયાઃ પુષ્કરેષુ સ્વરાશ્રયાઃ ॥ ૧૧૮॥

ગાન્ધારો વામકે કાર્યઃ ષડ્જો દક્ષિણપુષ્કરે ।
ઊર્ધ્વકે પઞ્ચમશ્ચૈવ માયૂર્યાં તુ સ્વરા મતાઃ ॥ ૧૧૯॥

વામકે પુષ્કરે ષડ્જ ઋષભો દક્ષિણે તથા ।
ઊર્ધ્વકે ધૈવતશ્ચૈવમર્ધમાયૂર્યુદાહૃતાઃ ॥ ૧૨૦॥

ઋષભઃ પુષ્કરે વામે ષડ્જો દક્ષિણપુષ્કરે ।
પઞ્ચમશ્ચોર્ધ્વકે કાર્યઃ કાર્મારવ્યાઃ સ્વરાસ્ત્વમી ॥ ૧૨૧॥

એતેષામનુવાદી તુ જાતીનાં યઃ સ્વરો મતઃ ।
આલિઙ્ગમાર્જનાં પ્રાપ્તો નિષાદઃ સ વિધીયતે ॥ ૧૨૨॥

માયૂરી મધ્યમગ્રામે ષડ્જે ત્વર્ધા તથૈવ ચ ।
કાર્મારવી તુ કર્તવ્યા સાધારણસમાશ્રયા ॥ ૧૨૩॥

સ્વરાઃ સ્થાનસ્થિતા યે તુ શ્રુતિસાધારણાશ્રયાઃ ।
ત એવ માર્જનકૃતાઃ શેષાઃ સઞ્ચારિણો મતાઃ ॥ ૧૨૪॥

વામકે ચોર્ધ્વકે કાર્યા આહાર્યા લેપતઃ સ્વરાઃ ।
શૈથિલ્યાદાયતત્ત્વાચ્ચાવધ્રાકોટનયાऽપિ ચ ॥ ૧૨૫॥

સ્વરાણાં સમ્ભવઃ કાર્યો માર્જનાસુ પ્રયોક્તૃભિઃ ।
માર્જના તુ કૃતા કાર્યા વામકોર્ધ્વકયોઃ સદા ॥ ૧૨૬॥

લક્ષણં મૃત્તિકાયાસ્તુ ગદતો મે નિબોધત ।
નિશ્શર્કરા નિસ્સિકતા નિસ્તૃણા નિસ્તુષા તથા ॥ ૧૨૭॥

ન પિચ્છિલા ન વિશદા ન ક્ષારા ન કટુસ્તથા ।
નાવદાતા ન કૃષ્ટા ચ નામ્લા નૈવ ચ તિક્તકા ॥ ૧૨૮॥

મૃત્તિકા લેપને શસ્તા તયા કાર્યા તુ માર્જના ।
નદીકૂલપ્રદેશસ્થા શ્યામા ચ મધુરા ચ યા ॥ ૧૨૯॥

તોયાપસરણશ્લક્ષ્ણા તયા કાર્યા તુ માર્જના ।
બધિરા હ્યવદાત્તા તુ કૃષ્ણા કુર્વીત ન સ્થિરા ॥ ૧૩૦॥

ન તુષા ન સ્વરકરી શ્યામા સ્વરકરી ભવેત્
યવગોધૂમચૂર્ણા વા તત્ર દદ્યાત્પ્રલેપને ।
એકસ્તસ્ય તુ દોષઃ સ્યાદેકસ્વરકૃતં ભવેત્ ॥ ૧૩૧॥

ત્રિસંયોગં નામ ।  ગુરુસઞ્ચયો લઘુસઞ્ચયો ગુરુલઘુસઞ્ચયશ્ચેતિ ॥ ૧૩૨॥

તત્ર ગુરુસઞ્ચયો નામ ।  ગુરુસ્થિતલયૌઘવૃત્તો યથા ।
ધન્તાં કેતાં ધન્દ્રા ં! ઘેતં ધન્ધં તથૈવ કેન્તાન્ધમ્ ।

દન્દન્દેન્દેન્દ્રા ઘેં!તાઙ્ખેન્તાખેન્તામિતિ ચ ગુરુ સ્યાત્ ॥ ૧૩૩॥

લઘુસઞ્ચયો નામ । ગુરુલઘુમધ્યપ્રવૃત્તો યથા
ઘટમટઘટમથટમથટમધિદ્ધડગુડઘડઘત્કૃલઘુ
ઘટમથિઘદ્ગુદુખઘદ્ઘઙ્કૃતો લઘુલયશ્ચ ।
ઇતિ સંયોગૌ જ્ઞેયૌ મૃદઙ્ગવાદ્યે પ્રયોગજ્ઞૈઃ ॥ ૧૩૪॥

ગુરુલઘુસઞ્ચયો નામ । ગુરુલઘુમધ્યમપ્રવૃત્તો યથા ।
ઘટથિમ્મથિથિં મથિતં કિટા
ઘટધિં ટત્થિમટકે ।
ઇતિ સંયોગો ગુરુલઘુપ્લુતઃ સ્યાત્ ॥ ૧૩૫॥

ત્રિગતં નામ । તત્ત્વમનુગતમોઘં ચેતિ
અક્ષરસદૃશં વાદ્યં સ્ફુટપદવર્ણં તથૈવ વૃત્તસમમ્ ।
સુવિભક્તકરણયુક્તં તત્ત્વે વાદ્યં વિધાતવ્યમ્ ॥ ૧૩૬॥

સમપાણ્યવપાણિયુતં સ્ફુટપ્રહારકરણાનુગં ચૈવ ।
ગેયસ્ય ચ વાદ્યસ્ય ચ ભવેદવધાતાય તદનુગતમ્ ॥ ૧૩૭॥

નૈકકરણાશ્રયગતં હ્યુપર્યુપરિપાણિકં દ્રુતલયં ચ ।
આવિદ્ધકરણબહુલં યોજ્યં વાદ્યં બુધૈરોઘે ॥ ૧૩૮॥

સર્વસ્યાપિ હિ વાદ્યસ્ય અષ્ટૌ સામ્યાનિ ભવન્તિ । તદ્યથા
અક્ષરસમમઙ્ગસમં તાલલયત્વં યતિસમકં ગ્રહસમકમ્ ।
ન્યાસાપન્યાસસમં પાણિસમં ચેતિ વિજ્ઞેયમ્ ॥ ૧૩૯॥

યદ્વૃત્તં તુ ભવેદ્ગાનં ગુરુલઘ્વક્ષરાન્વિતમ્ ।
તદ્વૃત્તં તુ ભવેદ્વાદ્યં તદક્ષરસમં ભવેત્ ॥ ૧૪૦॥

ધ્રુવાણાં ગ્રહમોક્ષેષુ કલાન્તરકલાસુ ચ ।
યદઙ્ગં ક્રિયતે વાદ્યં તદઙ્ગસમમુચ્યતે ॥ ૧૪૧॥

યચ્છરીરં ભવેદ્ગાનં કલાતાલપ્રમાણજમ્ ।
તત્પ્રમાણં તુ તદ્વાદ્યં તદ્વૈ તાલસમં ભવેત્ ॥ ૧૪૨॥

સ્થિતે મધ્યે દ્રુતે વાપિ લયે ગાનં તુ યદ્ભવેત્ ।
તથા ભવેત્તુ તદ્વાદ્યં તદ્વૈ લયસમં ભવેત્ ॥ ૧૪૩॥

સમા સ્રોતોગતા ચાપિ ગોપુચ્છા ચ યતિર્યથા ।

તથા ભવેત્તુ યદ્વાદ્યં તદ્વૈ યતિસમં ભવેત્ ॥ ૧૪૪॥

તતાવનદ્ધવંશાનામેકશ્રુતિકૃતોઽપિ ચ ।
ગ્રહો ગાનેન સહિતં તત્તુ ગ્રહસમં ભવેત્ ॥ ૧૪૫॥

ન્યાસાપન્યાસયોગસ્તુ સ્વરાણાં તુ ભવેદ્યથા ।
તદ્વદ્વાદ્યં યદાતોદ્યે ન્યાસાપન્યાસજં તુ તત્ ॥ ૧૪૬॥

સમપાણ્યર્ધપાણિસ્થં તથૈવોપરિપાણિકમ્ ।
ગીતવાદ્યાનુગં વાદ્ય જ્ઞેયં પાણિસમં તુ તત્ ॥ ૧૪૭॥

અષ્ટાદશજાતિકમિતિ યદુક્તં તદનુવ્યાખ્યાસ્યામઃ । તદ્યથા
શુદ્ધા પુષ્કરકરણા વિષમા વિષ્કમ્ભિતૈકરૂપા ચ ।
પાર્ષ્ણિસમા પર્યસ્તા સમવિષમકૃતા ચ કીર્ણા ચ ॥ ૧૪૮॥

પર્યવસાનોચ્ચિતિકા સંયુક્તા સમ્પ્લુતા મહારમ્ભા ।
વિગતક્રમા વિગલિતા વચ્ચિતિકા ચૈકવાદ્યા ચ ॥ ૧૪૯॥

એતાસાં જાતીનાં લક્ષણનિદર્શનાન્યભિવ્યાખ્યાસ્યામઃ
એકાક્ષરકૃતં વાદ્યં યદ્ભવેત્સાર્વમાર્ગિકમ્ ।
નિત્યં કરણયોગેન સા શુદ્ધા નામતો યથા ॥ ૧૫૦॥

ધન્ધન્દ્રં દ્રં ક્લાખોખોહાણેતિ વિહિતવાક્યા ।
સા શુદ્ધા વિજ્ઞેયા મધ્યસ્ત્રીણાં સદા જાતિઃ ॥ ૧૫૧॥

સ્વસ્તિકહસ્તવિચારા સર્વમૃદઙ્ગપ્રહારસંયુક્તા ।
સા ત્રિલયવાદ્યયુક્તા પુષ્કરકરણા ભવેજ્જાતિઃ ॥ ૧૫૨॥

ઘેન્તાઙ્કેન્તાઙ્ખેન્તાં દીર્ઘકૃતૈરક્ષરૈઃ કૃતા યા ચ ।
રાજ્ઞાં સ્વભાવગમને સા વિષમા નામતો જાતિઃ ॥ ૧૫૩॥

ગુરુયુગ્મં લઘુયુગ્મં તોટકં વાઽપિ ।
નિત્યં યત્ર તુ વાદ્યે વિષ્કમ્ભા નામ સા જાતિઃ ॥ ૧૫૪॥

વામોર્ધ્વકપ્રવૃત્તાદોઘે ક્ષિપ્તાવકૃષ્ટલયયુક્તા ।
સા કરુણા સ પ્રાયા જાતિઃ સ્યાદેકરૂપા તુ ॥ ૧૫૫॥

થિત્થં થિકટ્ થિન્ધિકટં મટથિકરણૈઃ સપાર્ષ્ણિકૃતૈઃ ।
થેક્લેટાઘેગ્રથિતા પાર્ષ્ણિસમા સા ભવેજ્જાતિઃ ॥ ૧૫૬॥

તાઘેન્તાન્તાન્દોઘેદોણ્ણામિત્યક્ષરૈસ્તુ સંયુક્તા ।

પર્યસ્તા જાતિરિયં મધ્યમપુરુષેષુ કર્તવ્યા ॥ ૧૫૭॥

કુત્વોપરિપાણિકૃતં વાદ્યં યદ્દ્રુતલયં સમારૂઢમ્ ।
પુનરેવ સમલયં સ્યાત્ સમવિષમા સા તુ વિજ્ઞેયા ॥ ૧૫૮॥

અવકીર્ણં યદ્ દ્વિગુણૈસ્ત્રિગુણૈર્વા કરણં મૃદઙ્ગાનામ્ ।
પણવેષુ દર્દરેષ્વવ્યવકીર્ણા નામ સા જાતિઃ ॥ ૧૫૯॥

પર્યવગચ્છતિ પૂર્વં યસ્મિન્ વૈ પ્રસ્તુતં કરણજાતમ્ ।
ત્રિવિધેઽપિ તુ લયયોગે પર્યવસાના તુ સા જાતિઃ ॥ ૧૬૦॥

ઘેણ્ટાન્દોણ્ણણ્ણુણહામેભિઃ સ્યાત્ત્વક્ષરૈર્હિ સમ્બદ્ધા ।
સામ્યાર્ધે ઉચ્ચિતિકા જાતિર્વાદ્યે તુ બોદ્ધવ્યા ॥ ૧૬૧॥

થઙ્કુટાઙ્કુટકિણામેભિર્યા ત્વક્ષરૈસ્તુ સંયુક્તા ।
સંયુક્તકૃતા જાતિઃ સા સા ચેટગતૌ વિધાતવ્યા ॥ ૧૬૨॥

સર્વાઙ્ગુલિચલનકૃતા સર્વમૃદઙ્ગપ્રહારસંયુક્તા ।
ભીતનભોયાનગતૌ સમ્પ્લુતજાતૌ વિધાતવ્યા ॥ ૧૬૩॥

અવપાણિકરણયુક્તં કૃત્વાદૌ મધ્યલયતુલ્યમ્ ।
વાદ્ય દ્રુતલયમન્તે જાતિઃ સ્યાત્સા મહારમ્ભા ॥ ૧૬૪॥

ઊર્ધ્વાઙ્કદક્ષિણમુખે ક્ષિપ્તપ્રહતા વિતસ્તમાર્ગા ચ ।
અઙ્કોર્ધ્વકપ્રવૃત્તા દક્ષિણવામપ્રહારજાતા ચ ॥ ૧૬૫॥

પ્રાયેણોદ્ધતમાર્ગા વિતસ્તમાર્ગાશ્રયેણ દિવ્યાનામ્ ।
ધન્દ્રા ં! ધન્દ્રા ં! પ્રાયા જાતિર્વિગતવલભા નામ ॥ ૧૬૬॥

લઘ્વક્ષરભૂયિષ્ઠા વિચિત્રકરણા ચ સર્વમાર્ગેષુ ।
વાદ્યાઽવિસર્પિકરણા વિગલિતનામા તુ સા જાતિઃ ॥ ૧૬૭॥

કરણૈર્બહુભિશ્ચિતૈઃ સર્વમૃદઙ્ગસંહારસંયુક્તા ।
સ્વાભાવિકોત્તમગતૌ વચ્ચિતિકા સા તુ વિજ્ઞેયા ॥ ૧૬૮॥

ધ્રોધ્રોધ્રેધ્રેધોધં એભિર્યા ત્વક્ષરૈશ્ચ સંયુક્તા ।
સા હ્યેકવાદ્યજાનિર્વૃત્તગતિવિધાનવત્ કાર્યા ॥ ૧૬૯॥

એવમેતેન વિધિના કર્તવ્યં વાદનં બુધૈઃ ।
ગતિપ્રચારે ગીતે ચ દશરૂપે વિશેષતઃ ॥ ૧૭૦॥

સપ્તરૂપવિધાનેન છન્દકાસારિતેષુ ચ ।
તત્ત્વં ચાનુગતં ચૈવ તદ્વૌઘો વાદ્યમિષ્યતે ॥ ૧૭૧॥

વાદ્યં ગુર્વક્ષરકૃતં તથાલ્પાક્ષરમેવ ચ ।
ગતિપ્રચારે કર્તવ્યં ગાને સમ્યગિહેચ્છતા ॥ ૧૭૨॥

તત્ત્વં ચાનુગતં ચાપિ ઓઘશ્ચાપિ કદાચન ।
રાજ્ઞાં લલિતગામિત્વાદ્વાદ્યં યોજ્યં સ્વભાવજમ્ ॥ ૧૭૩॥

તત્ત્વં તુ પ્રથમે ગાને દ્વિતીયેઽનુગતં ભવેત્ ।
તૃતીયે ત્વોઘસઞ્જ્ઞં તુ વાદ્યં ગતિપરિક્રમે ॥ ૧૭૪॥

ધ્રુવાસુ છન્દતશ્ચિત્રં શેષાણાં સમ્પ્રયોજયેત્ ।
તથા સ્થિતાવકૃષ્ટાયાં વાદ્યં ત્વનુગતં ભવેત્ ॥ ૧૭૫॥

પ્રાવેશિકીનાં કર્તવ્યં તત્ત્વં ચાનુગતં તથા ।
નૈષ્ક્રામિક્યન્તરકૃતં કાર્યં ત્રિલયવાહિતમ્ ॥ ૧૭૬॥

દ્રુતે પ્રાસાદિકીનાં દ્રુતં ચોઘં ચ વાદયેત્ ।
એવં ધ્રુવાણાં કર્તવ્યં વાદ્ય પ્રકરણાન્વિતમ્ ॥ ૧૭૭॥

માત્રાંશકવિકલ્પસ્તુ ધ્રુવાપાદેષુ યો ભવેત્ ।
સ તુ ભાણ્ડેન કર્તવ્યસ્તજ્જ્ઞૈર્ગતિપરિક્રમે ॥ ૧૭૮॥

એવં ગતિપ્રચારેષુ કાર્યં વાદ્ય પ્રયોક્તૃભિઃ ।
તાણ્ડવે સુકુમારે ચ વાદ્ય વક્ષ્યામિ તત્ત્વતઃ ॥ ૧૭૯॥

અભાણ્ડમેકં ગાનસ્ય પરિવર્તં પ્રયોજયેત્ ।
તસ્યાન્તે સન્નિપાતે ચ કાર્યો ભાણ્ડગ્રહો બુધૈઃ ॥ ૧૮૦॥

અથવા નૃત્તશોભાર્થમઙ્ગાનાં પરિવર્તનમ્ ।
સઙ્ગીતસ્ય પ્રકર્તવ્યં લયસ્ય ચ નિવર્તનમ્ ॥ ૧૮૧॥

યત્રાભિનેયમઙ્ગે તુ તત્ર વાદ્યં પ્રયોજયેત્
યત્ર પાણિવશાદઙ્ગં ભૂયો ભૂયો નિવર્તતે ।
સ તત્રાર્થોઽભિનેયસ્તુ શેષં નૃત્તેન યોજયેત્ ॥ ૧૮૨॥

યદ્વૃત્તં તુ પદં ગાને તાદૃશં વાદ્યમિષ્યતે ।
ગીતવાદ્યપ્રમાણેન કુર્યાચ્ચાઙ્ગવિચેષ્ટિતમ્ ॥ ૧૮૩॥

યથા ગુર્વક્ષરં ચૈવ તથાલ્પાક્ષરમેવ ચ ।

મુખે સોપોહને કાર્યં પ્રકૃતેર્વર્ણતસ્તથા ॥ ૧૮૪॥

સ્થિતે શુદ્ધપ્રહારં તુ મધ્યેઽક્ષરસમં તથા ।
કાર્યં તુ ગીતકે વાદ્યં દ્રુતે ચોપરિપાણિકમ્ ॥ ૧૮૫॥

સમં રક્તં વિભક્તં ચ તથા શુદ્ધપ્રહારજમ્ ।
નૃત્તાઙ્ગગ્રાહિ ચ તથા વાદ્યં કાર્યં તુ તાણ્ડવે ॥ ૧૮૬॥

સનૃત્તેષુ પ્રયોગેષુ તત્ત્વં હ્યનુગતં તથા ।
અનૃત્તેષુ પ્રયોગેષુ તત્ત્વમોઘં ક્રમેણ તુ ॥ ૧૮૭॥

સ્થિતે મધ્યે દ્રુતે ચાપિ યથા ગાનં તુ ગીયતે ।
તથા નૃત્તાઙ્ગહારેષુ તેન ચૈવ ક્રમેણ તુ ॥ ૧૮૮॥

યો વિધિર્ગાનવાદ્યાનાં પદાક્ષરલયાન્વિતા ।
સ તુ નૃત્તાઙ્ગહારેષુ કર્તવ્યો નાટ્યયોક્તૃભિઃ ॥ ૧૮૯॥

એતાસ્તુ જાતયઃ પ્રોક્તા દશ ચાષ્ટૌ ચ ભાણ્ડજાઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ પ્રકારાન્ વાદ્યસંશ્રયાન્ ॥ ૧૯૦॥

તદ્યથા । ચિત્રઃ સમો વિભક્તશ્ચિન્નશ્છિન્નવિદ્ધો વિદો
વાદ્યસંશ્રયોઽનુસૃતઃ પ્રતિવિદ્ધુતો દુર્ગોઽવકીર્ણોઽર્ધાવકીર્ણઃ
પરિક્ષિપ્ત એકરૂપો નિયમાન્વિતઃ સાચીકૃતઃ સમલેકશ્ચિત્રલેખઃ ।
સર્વસમવાયઃ કૃતો દૃઢ ઇતિ ॥ ૧૯૧॥

તત્ર
રિખિતોજકૃતશ્ચિત્રો નાનાકરણભૂષિતઃ ।
પ્રસન્નકરણં ચૈવ ત્રિપાણિલયસમ્ભવઃ ॥ ૧૯૨॥

દર્દરપણવમૃદઙ્ગૈર્નાનાકરણૈઃ સમનુયાતઃ ।
તાલાઙ્ગવેણુયુક્તઃ સ તુ વિજ્ઞેયઃ સમો નામ ॥ ૧૯૩॥

નાત્યાયતસ્તથા સ્યાદિહ સાસ્થાનસ્થિતો વિભક્તશ્ચ ।
અક્ષરપાણિલયેષુ ચ વિભક્તકરણે વિભક્તસ્તુ ॥ ૧૯૪॥

વાદ્યં દ્રુતલયં યત્ર સહસા વિનિવર્તતે ।
સર્વાતોદ્યેષુ ભિન્નેષુ પ્રકારશ્છિન્ન એવ સઃ ॥ ૧૯૫॥

અવપાણિમૃદઙ્ગેષુ પણવોપરિપાણિકઃ ।
યદા ભવન્તિ વાદ્યેષુ છિન્નવિદ્ધસ્ત્વસૌ ભવેત્ ॥ ૧૯૬॥

શુદ્ધાનુવિદ્ધં યદ્વાદ્યં સર્વાતોદ્યેષુ દૃશ્યતે ।
પરસ્પરાનુવેદ્યેન સોઽનુવિદ્ધ ઇતિ સ્મૃતઃ ॥ ૧૯૭॥

મૃદઙ્ગકરણે વાદ્યં પણવાનુગતં ચ યત્ ।
સૂચીવિદ્ધૈર્વિચિત્રૈસ્તુ કરણૈર્વિદ્ધ ઉચ્યતે ॥ ૧૯૮॥

વિશુદ્ધવાદ્યપ્રકૃતિઃ સમપાણિકૃતસ્તથા ।
સ્વરૂપાનુગતશ્ચૈવ વિજ્ઞેયો વાદ્યસંશ્રયઃ ॥ ૧૯૯॥

મુરજઃ પણવો વાપિ પણવો દર્દરોઽથવા ।
અનુવાદિ યદા વાદ્યે ભવેદનુસૃતસ્તુ સઃ ॥ ૨૦૦॥

અનુગમ્યં યદાતોદ્યં ગચ્છેત્સમલયં પુનઃ ।
શ્રાન્તવત્સમવાદ્યેષુ તદા સ્યાત્પર્તિવિદ્યુતઃ ॥ ૨૦૧॥

વાદ્યે પ્રચારવિષમઃ સર્વમાર્ગપ્રબોધનઃ ।
અવિભક્તાક્ષરપદઃ સ દુર્ગ ઇતિ કીર્તિતઃ ॥ ૨૦૨॥

સમવૃત્તૌ તુ મુરજાશ્છાદ્યન્તે પણવૈર્યદિ ।
નાના વિચિત્રૈઃ કરણૈરવકીર્ણઃ સ ઉચ્યતે ॥ ૨૦૩॥

દ્રુતં લયં સમારભ્ય પણવો દર્દરોઽપિ વા ।
અવપાણૌ યદા સ્યાતાં તદાત્વર્ધાવકીર્ણકઃ ॥ ૨૦૪॥

પણવૈશ્છાદિતં યત્ર વાદ્યમલ્પમૃદઙ્ગજમ્ ।
સુવિભક્તાક્ષરપદં પરિક્ષિપ્તઃ સ ઉચ્યતે ॥ ૨૦૫॥

સર્વાતોદ્યાનિ યત્રૈકં કરણં ભાવયન્તિ તુ ।
સમવૃત્તપદાન્યેવમેકરૂપ ઉદાહૃતઃ ॥ ૨૦૬॥

પ્રશાન્તનિયમોપેતઃ સ્ફુટવાદ્યસમન્વિતઃ ।
ઉપયાતિ ચ ગીતં યઃ સ જ્ઞેયો નિયમાન્વિતઃ ॥ ૨૦૭॥

ચિત્રં હિ કરણં યત્ર વાદ્યેનૈકેન વાદ્યતે ।
વૃત્તાઙ્ગહારાનુકૃતો જ્ઞેયઃ સાચીકૃતસ્તુ સઃ ॥ ૨૦૮॥

કૃત્વોપરિગતં વાદ્યં પણવો દર્દરોઽપિ વા ।
પ્રયાતિ મુરજં યત્ર સમલેખઃ સ કીર્તિતઃ ॥ ૨૦૯॥

ચિત્રં બહુવિધં વાદ્યં મૃદઙ્ગપણવાદિભિઃ ।
ક્રિયતે યત્ર સંરબ્ધૈશ્ચિત્રલેખઃ સ ઉચ્યતે ॥ ૨૧૦॥

સર્વમાર્ગગતો યસ્તુ સર્વપાણિલયાશ્રયઃ ।
વિચિત્રશ્ચ વિભક્તશ્ચ તત્સમં સમવાયિતમ્ ॥ ૨૧૧॥

યસ્તુ મધ્યલયોપેતઃ સમઃ સુવિહિતાક્ષરઃ ।
ગતિપ્રચારે વિહિતઃ પ્રકારો દૃઢ એવ સઃ ॥ ૨૧૨॥

એવમેતે પ્રકારાસ્તુ કર્તવ્યા વાદ્યસંશ્રયાઃ ।
ગતિપ્રચારે ગીતે વા રસભાવાનવેક્ષ્ય ચ ॥ ૨૧૩॥

પ્રકારા જાતયશ્ચૈવ સર્વમાર્ગેષુ સંસ્થિતાઃ ।
યે વૈ ગતિપ્રચારેષુ શુદ્ધાસ્તે કેવલા મતાઃ ॥ ૨૧૪॥

પ્રયોગમિદાનીં દક્ષ્યામઃ ।
તત્રોપવિષ્ટે પ્રાઙ્મુખે રઙ્ગે કુતપ એવ વિન્યાસઃ કર્તવ્યઃ ।
તત્ર પૂર્વોક્તયોર્નેપથ્યગૃહદ્વારયોર્મધ્યે કુતપ-વિન્યાસઃ કાર્યઃ ।
તત્ર રઙ્ગાભિમુખો મૌરજિકસ્તસ્ય પાણવિક-દર્દરિકૌ વામતઃ ।
એષ પ્રથમમવનદ્ધકેન તસ્ય તતઃ કુતપવિન્યાસ ઉક્તઃ ।
તત્રોત્તરાભિમુખો ગાયકઃ । ગાયકસ્ય તુ વામપાર્શ્વે વૈણિકઃ ।
વૈણિકસ્ય દક્ષિણેન વંશવાદકૌ ।
ગાતુરભિમુખં ગાયિકા । ઇતિ કુતપવિન્યાસઃ ॥ ૨૧૫॥

તત્ર ।
પ્રયોગેષુ પ્રણેતવ્યો વેશસ્થાનવશાનુગઃ ।
યથાસ્થાનસ્થિતેષ્વેષુ વામકાતોદ્યકેષુ ચ ॥ ૧૨૬॥

એવમચલાકમ્પિતાસ્ખલિતાસન્નોપવિષ્ટેષુ માર્દઙ્ગિકદાર્દરિકપાણવિકેષુ
શિથિલાઞ્ચિતવધ્રસ્તનિતેષુ
યથાગ્રામરાગમાર્જનાલિપ્તેષુ મૃદઙ્ગેષૂરુદ્વયનિપીડને તેષુ
નિગૃહીતાર્થનિગૃહીતમુક્તપ્રકારકૃતેષુ દર્દરવાદનવિન્યસ્તૈર્દૈવતાનામાવાહનવિસર્જનાર્થં ।
પ્રથમમેવ તાવત્ત્રિસામ કર્તવ્યમ્ ॥ ૨૧૭॥

વામે ચાન્દ્ર મસં સામ તત્પ્રીણયતિ પન્નગાન્ ।
દક્ષિણે જાલજં સામ તદૃષીન્ પ્રીણયસ્યથ ॥ ૨૧૮॥

ઉદીચ્યામપિ ચાગ્નેયં તદ્બૃહદ્દૈવતાનિ ચ ।
ત્રિસામ કીર્તિતં સમ્યક્ ત્રિસામત્વાદ્બુધૈરથ ॥ ૨૧૯॥

ત્રિપ્રકારં ત્રિગુણિતં તથા ચૈવાડ્ડિતાશ્રયમ્ ।
ત્રિકલં ષટ્કલં ચૈવ ત્રિસામ પરિકીર્તિતમ્ ॥ ૨૨૦॥

ત્રિસામાક્ષરપિણ્ડસ્તુ ગુરુલધ્વક્ષરાન્વિતઃ ।
યકારશ્ચ મકારશ્ચ ત્રિકૈસ્ત્રિગુણિતં ભવેત્ ॥ ૨૨૧॥

સમુદાયસ્તદપેક્ષમ્ । ત્રિચા દિઙ્ગલે ઝણ્ટું પ્રથમં સામ ।
ત્રિચા ઝણ્ટું દિઙ્ગલે દ્વિતીયમ્ । ત્રિચા ઝણ્ટું ઝણ્ટું તૃતીયમિતિ ।
તદન્તે પૂર્વરઙ્ગવિધાનમનુપ્રાપ્ય છન્દઃસમેનાક્ષરસમેન વા
વાદ્યેન બહિર્ગીત-વિધાનમનુવર્તિતવ્યમ્ ।
આસારિતપ્રયોગે ચ તત્ત્વાનુગતપ્રાયં વાદ્યં વિધાતવ્યમ્ ।
યત્ર ત્રિસામ સ પ્રત્યાહારાય ચાસાવવતીર્ણકોટી તત્ર વાદ્યં પ્રવર્તતે ।
તત્રાદૌ તાવદ્વામોર્ધ્વકપ્રહારયુતં પશ્ચાદાલિઙ્ગનવિમર્દનકરં
ગોપુચ્છાં ચ ત્રિસામા વિચિત્રકરણયુતં માર્દઙ્ગિકસર્વભાણ્ડિકમપિ
વાદ્યં પશ્ચાત્પ્રવર્તનીયમ્ । પૂર્વં હિ ભાણ્ડવાદ્યેન સિદ્ધિરુત્પાદનીયા ।
સ્ત્રીબાલમૂર્ખાવકીર્ણે ચ રઙ્ગે કુતૂહલજનનસમર્થવાદ્યમુપપન્નં ભવતિ ॥ ૨૨૨॥

અપિ ચ ।
આચાર્યાઃ સમમિચ્છન્તિ પરુચ્છેદં તુ પણ્ડિતાઃ ।
સ્ત્રિયો મધુરમિચ્છન્તિ વિકૃષ્ટમિતરે જનાઃ ॥ ૨૨૩॥

તસ્ય ચાન્તે તાણ્ડવપ્રયોગમધિકૃત્ય નર્તક્યા અવતરણકાલે
લઘુવર્ણસઞ્ચયમડ્ડિકેડઙ્ગુલિપ્રચલનપ્રાયં વાદ્યં યોજ્યમ્ ।
ગીતકસન્નિપાતે ચ લાસ્યામનુવાદ્યમ્ ।
તેન નૃત્તાઙ્ગહારાનુગતં કરણવાદ્યં પ્રયોજ્યમ્ ।
આલિપ્તમાર્ગેણ જાતિકરણાન્વિતમુત્થાપને વાદ્યં પ્રયોક્તવ્યમ્ ।
તતઃ પરં પરિવર્તનં ચાતુર્ભાગિકં શુદ્ધજાત્યા-શ્રયં
ચતુર્થકારપ્રવેશેષુ વાદ્યમઙ્ગુલિપ્રચલનપ્રાયમિતિ ।
નાન્દીશુષ્કાવકૃષ્ટાસુ કરણાશ્રિતં વાદ્યં યોજ્યમ્ ।
રઙ્ગદ્વારે પ્રરોચનાયા જર્જરે ત્રિગતે ચાર્યાં ચાડ્ડિતમાર્ગાશ્રિતં
સન્નિપાતગ્રહં પ્રયોક્તવ્યમ્ ।
મહાચાર્યાં વિતસ્તિમાગાશ્રિતં પ્રદેશિનીગ્રહમ્ ।
એવં તાવત્પૂર્વરઙ્ગે ભાણ્ડવાદ્યમુક્તમ્ । નાયકાનાં તુ સ્વસ્થગતિપ્રચારં
વક્ષ્યામઃ । તત્ર ઘન્દ્રા દ્રાં! દ્રાં! ં! ઇતિ દેવતાનામ્ ।

ઘેન્તાઙ્કેન્તાં — કૃણકિટિપ્રાયં વિપ્રાણામ્ ।
વ્યઞ્જકપ્રાયં મધ્યમાનામ્ ॥ ૨૨૪॥

એવં સ્વસ્થાવસ્થાગતિપ્રચારે વિધીયતે વાદ્યમ્ ।
દ્વિકલાશ્ચ તથૈકકલાશ્ચતુષ્કલાશ્ચૈવ પાદવિન્યાસાઃ ॥ ૨૨૫॥

તત્ર તુ સામ્યં કાર્યં ભાણ્ડે ચ સમં ચ ગાનેન ।
પુનશ્ચાવસ્થાકૃતં વાદ્યં વક્ષ્યામિ ત્વરિતગમને ॥ ૨૨૬॥

ધન્ધઙ્ઘેઘેટં ઇત્યેવં વાદ્યં પ્રયોક્તવ્યમ્ ।
રથવિષમાદિગતમઙ્ગુલિપ્રચલનકૃતં વિહિતમ્ ॥ ૨૨૭॥

તત્રૈવ પૂર્વં સમ્યગ્લિખિતં ગતિપ્રચારે તુ ।
પુનરન્યાવસ્થાયાં વાવિધાનં પ્રવક્ષ્યામિ ॥ ૨૨૮॥

ત્વરિતગમનેષુ ભાવા યે પૂર્વોક્તા ગતિપ્રચારેષુ ।
ધ્રઙ્ઘેર્ઘેર્ઘેપ્રાયં તત્ર તુ વાદ્યં પ્રયોક્તવ્યમ્ ॥ ૨૨૯॥

નૌરથવિમાનનેપથ્યાનિલાકાશજેઽઙ્ગુલીચલનાત્ ।
કાર્યં હિ તચ્ચતુષ્કેઽપ્યન્યોન્યસમાશ્રિતં વાદ્યમિતિ ॥ ૨૩૦॥

દુઃખાર્દિતવ્યાધિતેષ્ટજનવિયોગવિભવનાશવધબન્ધઃ ।
વ્રતનિયમોપવાસાદિયુક્તેષ્વાલિપ્તમાગબન્ધો વિધાતવ્યઃ ॥ ૨૩૧॥

દત્યદાનવયક્ષરાક્ષસપન્નગાદીનાં ધન્દ્રા ધં!દ્રા ધં!કુતામ્ ।
ઘેઘેટાપ્રાયં ખઞ્જવિકલપઙ્ગુવામનાદીનામ્ ॥ ૨૩૨॥

ટઘટાઘેપ્રાયં ચેટકુસત્વાદીનાં થોકટખુખણેત્યાદિકમ્ ।
યતિપાશુપતશાક્યાદીનાં ધહુધહુઘેઘેપ્રાયમ્ ॥ ૨૩૩॥

ઓપસ્થાપક નિર્મુણ્ડવર્ષવરાદીનાં
ઘેટાઙ્ઘોટામ્ભાણ્ટાણ્ણાણાપ્રાયમ્
વૃદ્ધશ્રોત્રિયકઞ્ચુકિસ્થૂલાદીનાં
ખOન્ધ્રોઘોખોખો ઇતિ પ્રાયમ્ ।
ગજવાજિખરોષ્ટ્રરથવિમાનયાનેષુ વઙ્કિટિપ્રાયમ્ ॥ ૨૩૪॥

સર્વત્રોત્તમમધ્યમાધમેષુ પુરુષેષ્વિસ્થં
રસભાવાનભિસમીક્ષ્ય વાદ્યં પ્રયોક્તવ્યમ્ ।
એવં તાવત્પુરુષવાદ્યમ્ ॥ ૨૩૬॥

સ્ત્રીણાં પુનરભિવ્યાખ્યાસ્યામઃ ।
તત્રોત્તમસ્ત્રીણાં મધ્યામાં ચ ટોસ્વધધિદોઘેણ્ટમધિકે ઇતિ પ્રાયમ્ ।
અથ રાજસ્ત્રીણાં ધઙ્ગિ-ઙ્ખમથિથિદોઙ્ખકખુખુપ્રાયમ્ ।
ધઙ્ગિતિકિથિઘટમટમટમથિથે ઇતિ બ્રાહ્મણીનામ્ ।
અથ મધ્યમસ્ત્રીણાં વેશ્યાશિલ્પકારીણાં
કિટિણ્ણાણં થઙ્ગુથિઙ્ઘટમથિહુણકિટિકિટિપ્રાયમ્ ।
ટમથિકુણ કેડખુખિખિ પ્રાયં ગીતં સ્ત્રીણામ્ ।
એવં તાવત્સામાન્યતોઽભિહિતં સ્ત્રીણામ્ ।
અવસ્થાન્તરિતાનાં તુ ત એવ પૌરુષા વાદ્યવિશેષા ભવન્તિ ।
સામાન્યતોઽભિનયે ભયશોક-ક્રૌઞ્છાદયો હિ ભાવા આસાં સમુત્પદ્યન્તે ।
આસામપિ રસભાવાભિનયાપેક્ષં ભાર્ગાશ્રિતં વાદ્ય ભવતિ ॥ ૨૩૬॥

અપિ ચ
જાતિમાર્ગપ્રચારૈસ્તુ કરણૈરક્ષરૈસ્તથા ।
વાદયેદ્યસ્ત્વસઙ્કીર્ણં સ શ્રેષ્ઠો વાદકો મતઃ ॥ ૨૩૭॥

અથાન્તરવાદ્યાનિ । અનુબન્ધો વિપ્રહારિતં સિદ્ધિર્ગ્રહણં પરિચ્છિન્નમિતિ ॥ ૨૩૮॥

તત્રાનુબન્ધસઞ્જ્ઞમન્તરવાદ્યં યથા ધોણાધોક્લઘે ઇતિ ।
પાઠ્યવિરામે વિપ્રહારિતં યથા ઘન્દ્રા ખઉઁ!ખ્ોણા ઇતિ ॥ ૨૩૯॥

સિદ્ધિરપિ ।
ઐશ્વર્યે વિસ્મૃતે શાન્તે વસ્ત્રાભરણસંયમે ।
સિદ્ધિર્વાદયિતવ્યા તુ નાનાકરણસંશ્રયા ॥ ૨૪૦॥

સા ચ સિદ્ધિર્યથા સમાર્ગકરણાશ્રયા કાર્યા વિચિત્રકરણા પઞ્ચકલા ।
અવસ્થાન્તરે પુનરેવમેવ કૃતા ભવતિ ॥ ૨૪૧॥

અપિ
સાધ્યવિરામે વાદ્યં પરિષત્સાધનકૃતે વિરામે ચ ।
વસ્ત્રાભરણનિપાતે પ્રકુર્યાદભ્યઞ્જને કાલે ॥ ૨૪૨॥

અથ પરિચ્છિન્નં સાર્વભાણ્ડિકમ્ ।
ધ્રુવાયો ગ્રહોપશમને ગમ્ભીરધીરપ્રહારમુદ્ધતં યથારસં ચ ષટ્કલમ્ ।
તત્રોત્તમાનાં વિતસ્ત-માર્ગાશ્રિતં દ્રં દ્રં ક્લેઘેકે ઇતિ ॥ ૨૪૩॥

અથોત્તમસ્ત્રીણામઙ્ગિતાવાદ્યાશ્રયણમ્ । ખો ખો ખા ઇતિ ।

અધમાનાં ખઞ્જનર્કુટકસ્થમ્ । યથા ટેઙ્ખાકિટિકિટિના ઇતિ ॥ ૨૪૪॥

અથપ્રાસાદિકીપ્રાવેશિક્યાક્ષેપિક્યવકૃષ્ટાસુ ।
તત્ર પ્રાસાદિકીપ્રાવેશિક્યોઃ સમપાણૌ વિભક્તકરણં વાદ્યમ્ ।
દ્રુતાયામુપરિપાણિર્વિચિત્રકરણં સ્થિતાવકૃષ્ટાયામર્થસન્નિપાતકૃતમિતિ ।
યથા ધોણ્ણેધોધો ઇતિ ॥ ૨૪૫॥

એવમેતત્પ્રયોક્તવ્યં વાદ્યં ગતિપરિક્રમે ।
પ્રાસાદિક્યાં ધ્રુવાયાં ચ ત્વન્તરાયાં તથૈવ ચ ॥ ૨૪૬॥

અભાણ્ડમેકં ગીતં તુ પરિવર્તં પ્રયોજયેત્ ।
સન્નિપાતાવસાનેષુ ભાણ્ડવાદ્યગ્રહો ભવેત્ ॥ ૨૪૭॥

અથ દ્રુતવિલમ્બિતાયાં યથા । તલખો તલખો તલખો ઇતિ ।
અથાડ્ડિતાયાં યથા । ધોણખોખોણકે—કુખુણાણાણા ખોદેં ક્લખઊઁકે ઇતિ ॥ ૨૪૮॥

અથોદ્ઘાત્યમ્ ।
સમ્ભ્રમાવેગહર્ષાર્થે વિસ્મયોત્સાહશોકજે ।
ગ્રહે ગાનસ્ય યદ્વાદ્યમુદ્ઘાત્યં સમ્પ્રકીર્તિતમ્ ॥ ૨૪૯॥

મોક્ષમિદાનીં વક્ષ્યામઃ । તદ્યથા ।
ખેન્નાન્તિકિઠિદત્તકિત્તકિકિદોત્તગોગોગઘેદોઘેટાઘેઘેરાદો ઇતિ । યથાડ્ડિતાયામ્ ।
ઘટમથિઘઙ્ઘઙ્ખોખોણખોખોણખોખો ચેણં ડક્કણિષ્કષણુડુપ્પ ઇતિ ।
અથ નર્કુટખઞ્જયોઃ । યોધન્દ્રા ધં!દ્રા તં!કિતાઙ્ગુટુગુટુ ઘે ઇતિ ।
અવસ્થિતાયામ્ ।
ઘઙ્ઘઙ્ઘેટમ્મટઘેઘેત્થિમટાડ્ડુટત્થિમટત્થિકટકિટીથિટી ઇતિ ।
અથાવકૃષ્ટાયામ્ । ઘટમટત્થિરથિગુટુઘેટ ઇતિ ॥ ૨૫૦॥

એવમેતે ગ્રહા મોક્ષા ધ્રુવાણાં ગદિતા મયા ।
નિષ્કામે ચ પ્રવેશે ચ ત્વાક્ષેપિક્યન્તરાસુ ચ ॥ ૨૫૧॥

ત્વં તાલકલાજ્ઞાને માર્દઙ્ગિકેન પ્રયતિતવ્યમ્ । ભવતિ ચાત્ર ।
અતાલજ્ઞમકાલજ્ઞમશાસ્ત્રજ્ઞં ચ વાદકમ્ ।
ચર્મઘાતકમિત્યેવં પ્રવદન્તિ મનીષિણઃ ॥ ૨૫૨॥

અનેનૈવવિધાનેન કાર્યં વાદ્યં પ્રયત્નતઃ
અધમાનાં નર્કુટખઞ્જષેદાત્ પ્રયુક્તં ચ વર્ણાન્તરિકા ।
અતઃપરં પ્રવક્ષ્યામિ ત્વાતોદ્યાનાં તુ લક્ષણમ્ ॥ ૨૫૩॥

ત્રિધા કૃતિર્મૃદઙ્ગાનાં હારીતકયવાશ્રયા ।
તથા ગોપુચ્છરૂપા ચ ભવન્ત્યેષાં ચ રૂપતઃ ॥ ૨૫૪॥

હરીતકા કૃતિસ્ત્વઙ્કો યવમધ્યસ્તથોર્ધ્વગઃ ।
આલિઙ્ગશ્ચૈવ ગોપુચ્છઃ આકૃત્યા સમ્પ્રકીર્તિતઃ ॥ ૨૫૫॥

તાલત્રયં તથાર્ધં ચ મૃદઙ્ગોઽઙ્કિક ઇષ્યતે ।
મુખં તસ્ય ચ કર્તવ્યં દ્વાદશાઙ્ગુલયોજિતમ્ ॥ ૨૫૬॥

ઊર્ધ્વકોઽપિ તથા કાર્યશ્ચતુસ્તાલપ્રમાણતઃ ।
અઙ્ગુલાનિ મુખં તસ્ય કર્તવ્યં તુ ચતુર્દશ ॥ ૨૫૭॥

આલિઙ્ગશ્ચૈવ કર્તવ્યસ્તાલત્રયમથાપિ ચ ।
મુખં તસ્યાઙ્ગુલાનિ સ્યુરષ્ટાદેવ સમાસતઃ ॥ ૨૫૮॥

દૈર્ઘ્યેણ પણવશ્ચૈવ કર્તવ્યઃ ષોડશાઙ્ગુલઃ ।
કૃશમધ્યાઙ્ગુલાન્યષ્ટૌ પઞ્ચાઙ્ગુલમુખસ્તથા ॥ ૨૫૯॥

ઓષ્ઠાવસ્ય તુ કર્તવ્યૌ તજ્જ્ઞૈરધ્યર્ધમઙ્ગુલમ્ ।
મધ્યં ચ સુષિરં તસ્ય ચત્વાર્યેવાઙ્ગુલાનિ ચ ॥ ૨૬૦॥

દર્દરશ્ચ ઘટાકારો નવાઙ્ગુલમુખસ્તથા ।
વિધાનં ચાસ્ય કર્તવ્યં ઘટસ્ય સદૃશં બુધૈઃ ॥ ૨૬૧॥

દ્વાદશાઙ્ગુલવિસ્તીર્ણં પીનોષ્ઠસ્ય સમાસતઃ ।
અતઃ પરં પ્રવક્ષ્યામિ ચર્મલક્ષણમુત્તમમ્ ॥ ૨૬૨॥

ન જ્વરોપહતં ચર્મ ન ચ કાકમુખાહતમ્ ।
નાપિ દોષહતં ક્લિન્નં ન ચ ધૂમાગ્નિદૂષિતમ્ ॥ ૨૬૩॥

એભિર્દોષૈર્વિનિર્મુક્તં ચર્મ નિર્વર્ત્યતે ગવામ્ ।
શુદ્ધપલ્લવસઙ્કાશં હિમકુન્દેન્દુપાણ્ડુરમ્ ॥ ૨૬૪॥

અત્યામિષવિહીનં તુ ક્લિનં વા ચર્મ કર્મણિ ।
વિદિત્વૈવ સુવર્ણાનિ ચર્માણ્યાહૃત્ય બુદ્ધિમાન્ ॥ ૨૬૫॥

શીતોદકે નિશામેકાં સ્થાપયિત્વા સમુદ્ધરત્ ।
વધ્રૈઃ સુલલિતૈર્દાત્રૈર્ગોમયૈરક્તમાર્જિતૈઃ ॥ ૨૬૬॥

ચન્દ્ર કૈસ્તનુભિઃ પશ્ચાત્ મૃદઙ્ગાન્ યોજયેદ્ બુધઃ ।
પુષ્પાવસ્તર્ત તતઃ કુર્યાત્ ત્રિવર્તિ ચન્દ્ર કાશ્રયામ્ ॥ ૨૬૭॥

કક્ષ્યાખ્યં વૈ પરિકરં ગ્રીવાખ્યં સ્વાસ્તિકં તથા ।
ત્રિશતં ચ પ્રકુર્વીત પુષ્કરે હ્યાક્ષિકાનિ તુ ॥ ૨૬૮॥

દશ તત્ર હિ વધ્રાસ્તુ પ્રક્ષેપ્યા વર્તિસંશ્રયાઃ ।
દ્વે હિત્વા ત્વાક્ષિકે વધ્ર તૃતીયે સમ્પ્રવેશયેત્ ॥ ૨૬૯॥

સર્વેષ્વેવં પ્રયોગોઽયમાક્ષિકેષુ વિધીયતે ।
તન્ત્રીભિઃ પણવં નહ્યેત્ સદૃઢાભિઃ સમન્તતઃ ॥ ૨૭૦॥

વાતપુષ્કરિકાં ચૈવ યોજયેત્તનુચર્મણા ।
એવં મૃદઙ્ગપણવાઃ કર્તવ્યા દર્દરાસ્તથા ॥ ૨૭૧॥

નવે મૃદઙ્ગે દાતવ્યં રોહણં સતતં બુધૈઃ ।
ગવ્યં ઘૃતં ચ તૈલં ચ તિલપિષ્ટં તથૈવ ચ ॥ ૨૭૨॥

તથા હ્યેતેન વિધિના ત્વાઙ્ગિકાલિઙ્ગકોર્ધ્વકાન્ ।
દેવતાભ્યર્ચનં કૃત્વા તતઃ સ્થાપ્યા મહીતલે ॥ ૨૭૩॥

ચિત્રાયામથવા હસ્તે શુક્લપક્ષે શુભેઽહનિ ।
ઉપાધ્યાયઃ શુચિર્વિદ્વાન્ કુલીનો રોગવર્જિતઃ ॥ ૨૭૪॥

મતિમાન્ ગીતિતત્ત્વજ્ઞો મધુરોઽવિકલેઽન્દ્રિ યઃ ।
સોપવાસોઽલ્પકેશશ્ચ શુક્લવાસા દૃઢવ્રતઃ ॥ ૨૭૫॥

મણ્ડલત્રયમાલિપ્ય ગોમયેન સુગન્ધિના ।
બ્રહ્માણં શઙ્કરં વિષ્ણું ત્રિષુ તેષુ પ્રકલ્પયેત્ ॥ ૨૭૬॥

આલિઙ્ગં સ્થાપયેત્પૂર્વં કૃતે બ્રાહ્મેઽથ મણ્ડલે ।
ઊર્ધ્વકં તુ દ્વિતીયેઽસ્મિન્ રુદ્ર નામ્નિ નિધાપયેત્ ॥ ૨૭૭॥

તિર્યગુત્સઙ્ગિકં સમ્યગ્વૈષ્ણવે મણ્ડલે ક્ષિપેત્ ।
બલિપુષ્પોપહારૈસ્તુ પૂજયેત્પુષ્કરત્રયમ્ ॥ ૨૭૭॥

પાયસં ઘૃતમધ્વક્તં ચન્દનં કુસુમાનિ ચ ।
શુક્લાનિ ચૈવ વાસાંસિ દત્વા લિઙ્ગે સ્વયમ્ભુવઃ ॥ ૨૭૯॥

ત્ર્! યમ્બકાય પ્રદાતવ્યઃ સગણાયોર્ધ્વકે બલિઃ ।
સ્વસ્તિકૈર્લાજિકાપુષ્પરૂપપિણ્ડાષ્ટકૈઃ સહ ॥ ૨૮૦॥

ઉન્મત્તકરવીરાર્કપુષ્પૈરન્યૈશ્ચ ભૂષિતઃ ।

બલિઃ કાર્યઃ પ્રયત્નેન રક્તકૌદુમ્બરૈઃ સહ ॥ ૨૮૧॥

વૈષ્ણવે મણ્ડલે સ્થાપ્યઃ સર્વબીજગતોઽઙ્કિકઃ ।
સ્રગ્વસ્ત્રાલેપનૈઃ પ્રીતૈશ્ચરુભિશ્ચ સપાયસૈઃ ॥ ૨૮૨॥

વાચયિત્વા દ્વિજૈઃ સ્વસ્તિં રત્વા પૂર્વં ચ દક્ષિણામ્ ।
પૂજયિત્વાદિગન્ધર્વાન્ પશ્ચાદ્વાદ્યં સમાચરેત્ ॥ ૨૮૩॥

દૈવતાનિ ચ વક્ષ્યામિ યેષાં તે ચ ભવન્તિ હિ ।
વજ્રેક્ષણઃ શઙ્કુકર્ણો ગ્રહશ્ચાપિ તથા મહાન્ ॥ ૨૮૪॥

એતાસ્તુ દેવતા વિપ્રાઃ પુષ્કરેષુ પ્રકીર્તિતાઃ ।
મૃણ્મયત્વાન્ મૃદઙ્ગાસ્તુ ભાણ્ડં ભ્રમયતીતિ ચ ॥ ૨૮૫॥

મુરજાસ્તૂર્ધ્વકરણાદાતોદ્યં તોદનાદપિ
ભાણ્ડસ્યાદૌ પ્રણીતોઽત્ર પણવશ્ચ વિધીયતે ।
દ્વારં શબ્દં દારયતિ તસ્માદ્ભવતિ દર્દરઃ ॥ ૨૮૬॥

સૃષ્ટ્વા મૃદઙ્ગામ્ પણવં દર્દરં ચ મહામુનિઃ ।
મેઘૈશ્ચ સ્વરસંયોગં મૃદઙ્ગાનામથાસૃજત્ ॥ ૨૮૭॥

વિદ્યુજ્જિહ્વો ભવેદ્વામે મેઘઃ સ તુ મહાસ્વનઃ ।
ઐરાવતો મહામેઘસ્તથા ચૈવોર્ધ્વકે ભવેત્ ॥ ૨૮૮॥

આલિઙ્ગકે તડિદ્વાંશ્ચ નામ્ના ચૈવ બલાહકઃ ।
દક્ષિણે પુષ્કરો મેઘઃ પુષ્કરો વામયોજિતઃ ॥ ૨૮૯॥

મૃદઙ્ગશ્ચૈવ નામ્ના તુ ઊર્ધ્વકે નન્દ્યથથોચ્યતે ।
અઙ્કિકઃ સિદ્ધિરિત્યેવમાલિઙ્ગશ્ચૈવ પિઙ્ગલઃ ॥ ૨૯૦॥

ભૂતપ્રિયો બલિસ્તેભ્યો દાતવ્યઃ સિદ્ધિમિચ્છતા ।
અપૂજયિત્વા હ્યેતાન્ વૈ નૈવ પ્રેક્ષાં પ્રયોજયેત્ ॥ ૨૯૧॥

કરીષસ્ય તુ સઙ્ઘાતે મૃદઙ્ગં સ્થાપયેદ્ બુધઃ ।
સુસભ્યા તાનચલિતાસ્તથા ચ પતિતા પુનઃ ॥ ૨૯૨॥

આતોદ્યપણવૈશ્ચૈવ નર્તકોપનતાસ્તથા ।
શાન્તિકર્મ પ્રયુઞ્જીત વિધિદૃષ્ટેન કર્મણા ॥ ૨૯૩॥

ચત્વારઃ પણવાઃ કાર્યાઃ દશરૂપવિધૌ પુનઃ ।
આતોદ્યાન્યપિ તાન્યેવ નાનાવસ્થાસુ વાદયેત્ ॥ ૨૯૪॥

નાટકે સપ્રકરણે ભાણકે પ્રહસને તથા
મૃદઙ્ગં પણવં ચૈવ દર્દરં ચૈવ વાદયેત્ ।
એવમેતદ્બુધૈર્જ્ઞેયં મૃદઙ્ગાનાં તુ લક્ષણમ્ ॥ ૨૯૫॥

ગતિવાદ્યતાલપાઠ્યગ્રહમોક્ષવિશારદોઽથ લઘુહસ્તઃ ।
છિદ્રા ચ્છેદવિધિજ્ઞઃ સિદ્ધસ્થાને ધ્રુવાકુશલઃ ॥ ૨૯૬॥

કલરિભિતમધુરહસ્તઃ સુનિવિષ્ટો રક્તમાર્જનો બલવાન્ ।
અવહિતશરીરબુદ્ધિર્મૃદઙ્ગવાદી ગુણૈરેતૈઃ ॥ ૨૯૭॥

આલેપનપ્રમાણજ્ઞશ્ચતુર્માર્ગકૃતશ્રમઃ ।
પ્રતિગ્રાહી ચ સિદ્ધીનામઙ્ગદોષવિવર્જિતઃ ॥ ૨૯૮॥

સ્વભ્યસ્તકરણઃ સામે ગીતજ્ઞો ગુણિતગ્રહઃ ।
સુસઙ્ગીતપ્રયોગજ્ઞો મૃદઙ્ગી તુ ભવેદ્ગુણૈઃ ॥ ૨૯૯॥

ભ્રાન્તોર્ધ્વહસ્તઃ કાલજ્ઞશ્છિદ્રા વરણપણ્ડિતઃ ।
અભ્યસ્તકરણશ્ચૈવ ભવેત્પાણવિકો ગુણૈઃ ॥ ૩૦૦॥

નિશ્ચલો નિપુણઃ શીઘ્રો લઘુહસ્તી વિધાનવિત્ ।
વાદનાન્તરવાદી ચ દર્દરી તુ પ્રશસ્યતે ॥ ૩૦૧॥

એતત્સર્વં નાટ્યયોગં સમીક્ષ્ય
પ્રોક્તં વાદ્યં સર્વલોકાનુભાવાત્ ।
નોક્તં યચ્ચેદાગમાદ્વસ્તુબુધ્યા ।
સદ્ભિઃ કાર્યં માર્ગજાતીઃ સમીક્ષ્ય ॥ ૩૦૨॥

સ્ફુટપ્રહારં વિશદં વિભક્તં
રક્તં વિકૃષ્ટં કરલેપનં ચ ।
ત્રિમાર્જનાપૂરિતરાગગમ્યં ।
મૃદઙ્ગવાદ્યં ગુણતો વદન્તિ ॥ ૩૦૩॥

વાદ્યે તુ યત્નઃ પ્રથમં તુ કાર્યઃ
શય્યા હિ નાટ્યસ્ય વદન્તિ વાદ્યમ્ ।
વાદ્યે ચ ગીતે ચ હિ સુ પ્રયુક્તે ।
નાટ્યપ્રયોગે ન વિપત્તિમેતિ ॥ ૩૦૪॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે પુષ્કરવાદ્યો નામાધ્યાયશ્ચતુસ્ત્રિંશઃ

*Natya Shastra Chapter 34*

pdf was typeset on June 20, 2025

Please send corrections to *sanskrit@cheerful.com*